## पञ्चमः पाठः

# सुभाषितानि

सुष्ठु भाषितं कथनं वा सुभाषितमिति कथ्यते। संस्कृतसाहित्यं तु सुभाषितानां वृहदागारः। संस्कृतसुभाषितानि लोके प्रसिद्धानि सुमधुराणि च सन्ति। सुभाषितप्रभावेण जनानामाचारविचारभावादिषु उदात्तता सञ्जायते। पाठेस्मिन् सङ्कलितेषु सुभाषितश्लोकेषु मनीषिकविभिरनुभूतजीवनस्यानुभवाः आदर्शाश्च प्रकटीभूताः। ते चास्माभिराचरणीयाः।

**यथैव पुष्पं प्रथमे विकाशे समेत्य पातुं मधुपाः पतन्ति।**
**एवं मनुष्यस्य विपत्तिकाले छिद्रेष्वनर्थाः बहुली भवन्ति॥1॥**

**अन्वयः** – यथैव प्रथमे विकाशे मधुपाः समेत्य पुष्पं पातुं पतन्ति एवं मनुष्यस्य विपत्तिकाले छिद्रेषु बहुली अनर्थाः भवन्ति।

**शब्दार्थो:** – समेत्य – सम्यक् आगत्य (भली प्रकार आ कर), छिद्रेष्वनर्थाः – दूषणेषु अपघाताः (दोषों में अभिवृद्धि)

**व्यतिषजति पदार्थानन्तरः कोऽपि हेतु**
**र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।**
**विकसति हि पतङ्गस्योदये पुण्डरीकं,**
**द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥2॥**

**अन्वयः** – अन्तरः कोऽपि हेतुः पदार्थान् व्यतिषजति, प्रीतयः बहिरुपाधीन् न संश्रयन्ते खलु, हि पतङ्गस्य उदये पुण्डरीकं विकसति, हिमरश्मौ उद्गते चन्द्रकान्तः द्रवति।

**शब्दार्थः** – व्यतिषजति – परस्परसंलग्नान् (एक दूसरे को जोड़ती है), संश्रयन्ते – आश्रयन्ते (आश्रय प्राप्त करते हैं), चन्द्रकान्तः – चन्द्रकान्तमणिः (चन्द्रकान्त नामक मणि)

**रे रे चातक सावधानमनसा मित्रं क्षणं श्रूयताम्**
**अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।**
**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा**
**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥3॥**

**अन्वयः** – रे रे मित्र चातक! सावधानमनसा क्षणं श्रूयताम्, हि गगने बहवः अम्भोदाः सन्ति, सर्वे अपि एतादृशाः न, केचित् वसुधां वृष्टिभिः आर्द्रयन्ति केचिद् वृथा गर्जन्ति, (त्वम्) यं यं पश्यसि तस्य तस्य पुरतो दीनं वचः मा ब्रूहि।

**शब्दार्थः** – अम्भोदाः – मेघाः (बादल), वसुधाम् – पृथिवीम् (धरती को)

**करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता,**
**मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलम्।**
**हृदि स्वच्छा वृत्तिः श्रुतमधिगतैकव्रतफलम्।**
**विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥4॥**

**अन्वयः** – इदम् प्रकृति महतां मण्डनम् ऐश्वर्येण विना अपि करे त्यागः श्लाघ्यः, शिरसि गुरुपादप्रणयिता, मुखे सत्या वाणी, विजयि भुजयोः, अतुलं वीर्यम्, हृदि स्वच्छा वृत्तिः, श्रुतम् अधिगतैकव्रतफलम्।

**शब्दार्थौः** – श्लाघ्यः – प्रशंसनीयः (प्रशंसा करने योग्य), मण्डनम् – सौन्दर्यम् (सुन्दरता)

**भवन्ति नम्रास्तरवः फलोद्गमैः,**
**नवाम्बुभिर्भूमिविलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः,**
**स्वभाव एवैष परोपकारिणाम्॥5॥**

**अन्वयः** – तरवः फलोद्गमैः नम्राः, घनाः नवाम्बुभिः भूमिविलम्बिनः, सत्पुरुषाः समृद्धिभिः अनुद्धताः भवन्ति। परोपकारिणाम् एष एव स्वभावः।

**शब्दार्थौः** – विलम्बिनो – विशिष्टलम्बायमानः (विशेष झुके हुए), अनुद्धताः – गर्वमुक्ताः (अहंकार रहित)

**श्रुतिर्विभिन्ना स्मृतयश्च भिन्नाः**
**नैको मुनिर्यस्य वचः प्रमाणम्।**
**धर्मस्य तत्त्वं निहितं गुहायां**
**महाजनो येन गतः स पन्थाः॥6॥**

**अन्वयः** – विभिन्नाः श्रुतिः भिन्नाः च स्मृतयः, एको मुनिः न यस्य वचः प्रमाणम्, (यतः) धर्मस्य तत्त्वं गुहायां निहितम्, महाजनो येन गतः स (एव) पन्थाः।

**शब्दार्थः** – श्रुतिः – वेदाः (चारों वेद), निहितम् – स्थितम् (स्थित), स्मृतयः – मन्वादिस्मृतिग्रन्थाः (मनु आदि के स्मृति ग्रन्थ)

**सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम्।**
**सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति॥7॥**

**अन्वयः** – घनान्धकारेषु दीपदर्शनम् इव सुखं दुःखानि अनुभूय शोभते हि। तु यो नरः सुखात् दरिद्रतां याति सः शरीरेण धृतः मृतः (इव) जीवति।

**शब्दार्थः** – दरिद्रताम् – निर्धनताम् (गरीबी को)

**गुणवदगुणवद्वा कुर्वता कार्यमादौ**
**परिणतिरवधार्या यत्नतः पण्डितेन।**
**अतिरभसकृतानां कर्मणामाविपत्ते**
**र्भवति हृदयदाही शल्यतुल्यो विपाकः॥8॥**

**अन्वयः** – पण्डितेन आदौ गुणवद् वा अगुणवद् कार्यं कुर्वता यत्नतः परिणतिः अवधार्य अतिरभसकृतानां कर्मणाम् हृदयदाही शल्यतुल्यो विपाकः भवति।

**शब्दार्थः** – अतिरभसं – त्वरितम् (शीघ्रता), हृदयदाही – हृद्दाहकः (हृदय को जलाने वाला), शल्यतुल्यो – व्रण इव (घाव के समान), विपाकः – विशिष्टदाहकः (विशेष दाहक)

**उत्साहसंपन्नमदीर्घसूत्रं**
**क्रियाविधिज्ञं व्यसनेष्वसक्तम्।**
**शूरं कृतज्ञं दृढसौहृदं च**
**लक्ष्मीः स्वयं याति निवासहेतोः ॥9॥**

**अन्वयः** – उत्साहसम्पन्नम्, अदीर्घसूत्रम्, क्रियाविधिज्ञम्, व्यसनेषु असक्तम्, शूरम्, दृढसौहृदम् कृतज्ञं च (नरस्य समीपं) लक्ष्मीः निवासहेतोः स्वयं याति।

**शब्दार्थः** – अदीर्घसूत्रम् – त्वरितनिर्णयी (शीघ्र निर्णय लेने वाला)

**आदित्यचन्द्रावनिलोऽनलश्च**
**द्यौर्भूमिरापो हृदयं यमश्च।**
**अहश्च रात्रिश्च उभे च सन्ध्ये**
**धर्मश्च जानाति नरस्य वृत्तम् ॥10॥**

**अन्वयः** – आदित्यः चन्द्रः, अनिलश्च अनलः, द्यौः, भूमिः, आपः, हृदयम्, यमः च, अहः च रात्रिः च उभे सन्ध्ये च धर्मः च नरस्य वृत्तं जानाति।

**शब्दार्थः** – द्यौः – आकाशः (गगन)

## अभ्यासः

**1. एकपदेन उत्तरत –**

(क) कस्मिन् काले छिद्रेष्वनर्थाः बहुली भवन्ति?

(ख) पतङ्गस्योदये किं विकसति?

(ग) अम्भोदाः वसुधां काभिः आर्द्रयन्ति?

(घ) मुखे कीदृशी वाणी भवितव्या?

(ङ) पण्डितेन यत्नतः का अवधार्या?

(च) दुःखान्यनुभूय किं शोभते?

**2. एकवाक्येन उत्तरत –**

(क) चन्द्रकान्तः कदा द्रवति?

(ख) तरवः कैः नम्राः भवन्ति?

(ग) सत्पुरुषाः समृद्धिभिः कथं भवन्ति?

(घ) कः पन्थाः?

(ङ) कः धृतः शरीरेण मृतः जीवति?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत -**

(क) कथं छिद्रेष्वनर्थाः बहुली भवन्ति?

(ख) 'रे रे चातक......मा ब्रूहि दीनं वचः' इत्यस्य श्लोकस्य कः भावः?

(ग) महतां मण्डनं किम्?

(घ) हृदयदाही शल्यतुल्योः विपाकः कदा भवति?

(ङ) लक्ष्मीः स्वयं निवासहेतोः कं याति?

(च) के के नरस्य वृत्तं जानन्ति?

4. **उचितं मेलयत-**

| | (अ) | (ब) |
|---|---|---|
| (क) | विनाप्यैश्वर्येण | परोपकारिणाम् |
| (ख) | स्वभाव एवैष | प्रकृतिमहतां मण्डनमिदम् |
| (ग) | महाजनो येन गतः | यत्नतः पण्डितेन |
| (घ) | यथैव पुष्पं प्रथमे विकाशे | स पन्थाः |
| (ङ) | परिणतिरवधार्या | समेत्य पातुं मधुपाः पतन्ति |

5. **रिक्तस्थानानि पूरयत -**

(क) द्रवति च..............चन्द्रकान्तः।

(ख) ...........छिद्रेष्वनर्थाः।

(ग) मा ब्रूहि................वचः।

(घ) सुखं हि.................शोभते।

(ङ) भवति हृदयदाही.............विपाकः।

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत-**

(क) छिद्रेष्वनर्थाः

(ख) हिमरश्मावुद्गते

(ग) नम्रास्तरवः

(घ) सुखात्तु

(ङ) दुःखान्यनुभूय

7. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत -**

(क) गुरुपादप्रणयिता

(ख) क्रियाविधिज्ञम्

(ग) हृदयदाही

(घ) व्रतफलम्

(ङ) फलोद्गमैः

8. **अधोलिखितानां पदानां मूलशब्दं विभक्तिं वचनं च लिखत –**

| | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) मधुपाः | -------- | -------- | -------- |
| (ख) विपत्तिकाले | -------- | -------- | -------- |
| (ग) पुण्डरीकम् | -------- | -------- | -------- |
| (घ) शिरसि | -------- | -------- | -------- |
| (ङ) फलौद्गमैः | -------- | -------- | -------- |
| (च) समृद्धिभिः | -------- | -------- | -------- |
| (छ) परोपकारिणाम् | -------- | -------- | -------- |
| (ज) स्मृतयः | -------- | -------- | -------- |
| (झ) पन्थाः | -------- | -------- | -------- |
| (ञ) वृत्तम् | -------- | -------- | -------- |

9. **अधोलिखितपदानां धातुं लकारं पुरुषं वचनं च लिखत–**

| | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) पतन्ति | -------- | -------- | -------- | -------- |
| (ख) भवन्ति | -------- | -------- | -------- | -------- |
| (ग) द्रवति | -------- | -------- | -------- | -------- |
| (घ) आहुः | -------- | -------- | -------- | -------- |
| (ङ) संश्रयन्ते | -------- | -------- | -------- | -------- |
| (च) ब्रूहि | -------- | -------- | -------- | -------- |
| (छ) शोभते | -------- | -------- | -------- | -------- |
| (ज) याति | -------- | -------- | -------- | -------- |
| (झ) जीवति | -------- | -------- | -------- | -------- |
| (ञ) जानाति | -------- | -------- | -------- | -------- |

10. **अधोलिखितानां भावविस्तारं कुरुत –**

(क) छिद्रेष्वनर्थाः बहुली भवन्ति।

(ख) यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।

(ग) विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्।

(घ) महाजनो येन गतः स पन्थाः।

(ङ) धृतः शरीरेण मृतः स जीवति।

**11. अधोलिखितानां पदानां विलोमपदं लिखत-**

(क) कृतज्ञम् –

(ख) शूरम् –

(ग) अदीर्घसूत्रम् –

(घ) गुणवद् –

(ङ) दीनम् –

(च) सत्या –

(छ) कीर्तिम् –

(ज) आदौ –

**12. अधोलिखितानां श्लोकानामन्वयं कुरुत -**

(क) यथैव पुष्पं................बहुली भवन्ति।

(ख) रे रे चातक..........मा ब्रूहि दीनं वचः।

(ग) करे श्लाघ्यस्त्यागः ............मण्डनमिदम्।

(घ) भवन्ति नम्रास्तरवः..............परोपकारिणाम्।

(ङ) उत्साहसम्पन्न............निवासहेतोः।

(च) आदित्यचन्द्रा..............नरस्य वृत्तम्।

## योग्यताविस्तारः -

- पाठे आगतानि सुभाषितानि कण्ठस्थं कुरुत।
- अन्यान्यपि सुभाषितानि कण्ठस्थं कुरुत।
- सुभाषितश्लोकानां लयबद्धगानं कुरुत।